# Devaih Krita Parvati Stava

# देवैः कृता पार्वतीस्तवः

## Document Information

Text title : Devaih Krita Parvati Stava

File name : pArvatIstavaHdevaiHkRRitA.itx

Category : shiva, shivarahasya, pArvatI, stava

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 55 - devakRitopaniShatstutiH | 29-33||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2023

*sanskritdocuments.org*

# देवैः कृता पार्वतीस्तवः

शरच्छशिसमानने जितगजेन्द्रयाते शिवे
सुनीलजलदोपमोज्ज्वलकचे सुनबिम्बाधरे ।
सुनीलनयनाञ्चलोत्पलसमाननेत्राञ्चले
दयारसघने शिवे सदयमद्य नः पालय ॥ २९॥

सुरासुरमुनिव्रजैर्नतपदाम्बुजे शङ्करि
महेश्वरमहाङ्कगे विकचमल्लिधम्मिलके ।
भवानि भवनाशिनि हरितभक्तपापव्रजे
नमाम पदपङ्कजं तव विमुक्तिदं केवलम् ॥ ३०॥

कदम्बवनसंस्थिते मणिकदम्बकान्तिप्रिये
शरच्छशिसुबिम्बवत्प्रथितवक्त्रबिम्बाधरे ।
सुगन्धतरबन्धुरायितसुगात्रिताम्भोरुहो-
ज्वलन्नयनकोटिके नतगुहादिहेरम्बके ॥ ३१॥

नगेन्द्रकुलकन्यके विधृतसामिसोमालके
महेश्वरि सुयल्लके ह्यसुरजालसम्भल्लके ।
नमाम पदपल्लवं तत्र सुगल्लमौलिस्फुर-
त्सुरोत्तमकिरीटकज्वलितपापमल्लापहम् ॥ ३२॥

कुलाचलकुलं त्वया तिलककान्तमीशे कृतं
कुलाचलभ(श)याश्रयात्कुलिशिताघमङ्घे शिवे ।
कुलीनजनमानसाश्रयणपादपद्मो ज्वले
प्रसीद पवनानलैर्नतपदाम्बुजे शङ्करि ॥ ३३॥

॥ इति शिवरहस्यान्तर्गते माहेश्वराख्ये देवैः कृता पार्वतीस्तवः ॥

- ॥ श्रीशिवरहस्यम् । माहेश्वराख्यः प्रथमांशः । अध्यायः ५५ - देवकृतोपनिषत्स्तुतिः । २९-३३ ॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 55 - devakRRitopaniShatstutiH . 29-33..

Notes:
Deva-s देवाः eulogize Pārvatī पार्वती.

Encoded and proofread by Ruma Dewan

*Devaih Krita Parvati Stava*

pdf was typeset on December 17, 2023

Please send corrections to *sanskrit@cheerful.com*